# રામાયણરહસ્યં વિદ્યારણ્યકૃતમ્

Ramayanarahasyam by Vidyaranya

sanskritdocuments.org

February 24, 2018

# Ramayanarahasyam by Vidyaranya

# રામાયણરહસ્યં વિદ્યારણ્યકૃતમ્

## Sanskrit Document Information

Text title : Ramayanarahasya by Vidyaranya

File name : rAmAyaNarahasyamvidyAraNya.itx

Category : raama

Location : doc_raama

Author : Vidyaranya (Different than Swami Vidyaranya), Comments by Venkata Subramanian

Transliterated by : Venkata Subramanian venkatasubr at gmail.com

Proofread by : Venkata Subramanian, Sunder Hattangadi sunderh at hotmail.com

Description/comments : Scholarly tratment of Gayatrimantra rahasya

Latest update : February 24, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 24, 2018

*sanskritdocuments.org*

# રામાયણરહસ્યં વિદ્યારણ્યકૃતમ્

શ્રીઃ ॥

ગુણાઢ્યત્વં કારણત્વં શરણ્યત્વં પ્રકાશતા ।
પ્રકાશિત્વં ચ નિખિલૈર્ધ્યેયતા ચ નિયન્તૃતા ॥ ૧॥

એતે બ્રહ્મગુણા નિત્યા ગાયત્રીપદબોધિતાઃ ।
પ્રથમેન ગુણાઢ્યત્વં દ્વિતીયેન ચ લક્ષણમ્ ॥ ૨॥

તૃતીયેન શરણ્યત્વં ચતુર્થેન પ્રકાશતા ।
પઞ્ચમેન પદેનૈવ પ્રકાશિત્વં પ્રબોધ્યતે ॥ ૩॥

ષષ્ઠેન ધ્યેયતાઽથાન્ત્યૈશ્ચતુર્ભિશ્ચ નિયન્તૃતા ।
શ્રીસઙ્ક્ષેપેઽપિ દૃશ્યન્તે મન્ત્રવાચ્યા ઇમે ગુણાઃ ॥ ૪॥

કો ન્વસ્મિન્ સામ્પ્રતં લોક ઇત્યારભ્ય વિશેષતઃ ।
ઉક્તા ગુણાઢ્યતા વિષ્ણોઃ શ્લોકૈરષ્ટાદશૈઃ સ્ફુટમ્ ॥ ૫॥

ગુણપ્રકરણેઽત્રૈવાપ્યુક્તાઃ કારણતાદયઃ ।
પ્રજાપતિસમઃ શ્રીમાન્ ધાતેતિ સ્રષ્ટૃતેરિતા ॥ ૬॥

સંહર્તૃતા ચાત્ર રિપુનિષૂદન ઇતીરિતા ।
રક્ષિતા જીવલોકસ્યેત્યાદિના સ્થિતિકર્તૃતા ॥ ૭॥

ઇત્થં કારણતાઽનેન શ્લોકેન પ્રતિપાદિતા ।
સર્વદાઽભિગતઃ સદ્ભિઃ સમુદ્ર ઇવ સિન્ધુભિઃ ॥ ૮॥

ઇત્યાદિષુ શરણ્યત્વં શરણ્યસ્યાભિધીયતે ।
જ્ઞાનસમ્પન્ન ઇત્યત્ર પ્રકાશત્વં પ્રદૃશ્યતે ॥ ૯॥

જ્ઞાનત્વેનૈવ સમ્પન્ન ઇતિ જ્ઞાનાત્મતેરિતા ।
નો ચેત્સર્વજ્ઞશબ્દેન પુનરુક્તિર્ભવેદિતિ ॥ ૧૦॥

સર્વજ્ઞઃ સત્યસન્ધશ્ચ પ્રજાનાં ચ હિતે રતઃ ।

ઇત્યત્ર સ્થિતસર્વજ્ઞપદેનોક્તા પ્રકાશિતા ॥ ૧૧॥

યશસ્વી જ્ઞાનસમ્પન્નઃ શુચિર્વશ્યઃ સમાધિમાન્ ।
ઇત્યત્ર વશ્યશબ્દેન ભક્તવશ્યત્વવાચિના ॥ ૧૨॥

ધ્યેયત્વં ચ ગુણો વિષ્ણોરર્થતઃ પ્રતિપાદિતઃ ।
નિયતાત્મા મહાવીર્યો દ્યુતિમાન્ધૃતિમાન્વશી ॥ ૧૩॥

ઇત્યત્ર વશિશબ્દેન બોધ્યતે ચ નિયન્તૃતા ।
વૃત્તાન્તે યૌવરાજ્યાદૌ સૂચ્યન્તે ત ઇમે ગુણાઃ ॥ ૧૪॥

સામાન્યેન ગુણાઢ્યત્વં સુસ્પષ્ટં તત્ર તત્ર ચ ।
શબરીશરભઙ્ગાદિવૃત્તાન્તે સ્થિતિકર્તૃતા ॥ ૧૫॥

દશગ્રીવવધાદ્યે તુ વૃત્તાન્તે લયકર્તૃતા ।
ઇત્યાદૌ જન્મકર્તૃત્વં સમુત્થાપ્ય ચ વાનરાન્ ॥ ૧૬॥

વિભીષણાદિવૃત્તાન્તે શરણ્યત્વં પ્રકાશિતમ્ ।
નિગ્રહાનુગ્રહત્વાભ્યામીશત્વં તસ્ય બોધિતમ્ ॥ ૧૭॥

ઇત્યત્રાર્થાદ્ધ્યેયતા ચ પૂજિતઃ સર્વદૈવતૈઃ ।
ચાતુર્વર્ણ્યં ચ લોકેઽસ્મિન્ સ્વે સ્વે ધર્મે નિયોક્ષ્યતિ ।
ઇત્યાદિષુ નિયન્તૃત્વમિત્યર્થઃ સામ્પ્રદાયિકઃ ॥ ૧૮॥

અત્રેદં માનમુક્તાર્થસમ્પ્રદાયનિયામકમ્ ।
પ્રબન્ધાદ્યન્તયોર્દૃષ્ટે ગાયત્ર્યાદ્યન્તિમાક્ષરે ॥ ૧૯॥

ઉક્તાર્થવિષયાચ્ચાન્યો વિશેષઃ સામ્પ્રદાયિકઃ ।
અસ્તિ ગુહ્યતમઃ સોઽપિ વિસ્તરેણ પ્રકાશ્યતે ॥ ૨૦॥

પ્રણમ્ય માધવારણ્યં તત્પ્રાપ્તાદુપદેશતઃ ।
વ્યાકરોમ્યત્ર ગાયત્રીમન્ત્રવર્ણાન્પૃથક્ પૃથક્ ॥ ૨૧॥

આદિવર્ણો હરેર્વક્તિ સત્યજ્ઞાનાદિકાન્ ગુણાન્ ।
તદ્ગુણે પ્રકૃતાર્થોક્તૌ બ્રહ્મહેત્વોરિતિ સ્મૃતેઃ ॥ ૨૨॥

સશ્ચ સત્યપ્રતિજ્ઞત્વં વક્તિ સઃ પુંસ્યુમાસુતે ।
વાયૌ જ્ઞાને બુધે સત્યપ્રતિજ્ઞાયામિતિ સ્મૃતેઃ ॥ ૨૩॥

પરાભિભૂતિસામર્થ્યં વિકારેણ વિબોધ્યતે ।
વિશ્વક્ષુષિ વ્યોમ્નિ વાતે પરમાત્મનિ પક્ષિણિ ॥ ૨૪॥

વૈશ્યે વિજયસામર્થ્યે વિશેષેઽર્ક ઇતિ સ્મૃતઃ ।
તુકારેણોચ્યતે વિષ્ણોશ્ચક્રાદ્યાયુધસઙ્ગ્રહઃ ॥ ૨૫॥

તુરાયુધે તદાદાને ચોરે કાન્તાવિતિ સ્મૃતઃ ।
વક્તિ પૂર્વવકારોઽયં હરેરભયદાયિતામ્ ॥ ૨૬॥

વો ભૌનિવારણે પૂજ્યે સાન્ત્વે કામ ઇતિ સ્મૃતઃ ।
રેકારસ્તુ ભગવતો વક્તિ ભક્તનિષેવ્યતામ્ ॥ ૨૭॥

રેશબ્દઃ પાવકે કામે ભક્તસેવ્ય ઇતિ સ્મૃતઃ ।
ણિકારો બ્રહ્મણો વક્તિ દીનાનાથશરણ્યતામ્ ॥ ૨૮॥

ણઃ શરણ્યકૃપાશૂરભીતિપદ્યેષ્વિતિ સ્મૃતઃ ।
યકારઃ પૂર્વપાદાન્તો મિત્રવિશ્વાસવાચકઃ ॥ ૨૯॥

યસ્ત્યાગે નિલયે કામે દાતરીશે ચ ધાતરિ ।
ભીત્યભાવે યમે મિત્રે વિશ્વાસેઽગ્નાવિતિ સ્મૃતઃ ॥ ૩૦॥

બલાવિષ્કરણં વિષ્ણોર્ભકારેણ પ્રકાશ્યતે ।
ભઃ શમ્ભૌ ભ્રમણે ભાવે સત્વવ્યક્તાવિતિ સ્મૃતઃ ॥ ૩૧॥

આશ્રિતાનન્દકારિત્વં ગકારેણાભિધીયતે ।
ગશ્ચ હર્ષપ્રદે ગીતે ગન્ધર્વોક્તાવિતિ સ્મૃતઃ ॥ ૩૨॥

દેકારેણ વકારેણ સર્વપૂજ્યત્વમુચ્યતે ।
દેકારો દાતરિચ્છેદે પૂજ્યે દાનકલત્રયોઃ ।
વો ભીનિવારણે પૂજ્યે સાન્ત્વે કામ ઇતિ સ્મૃતઃ ॥ ૩૩॥

સ્યશબ્દેનોચ્યતે વિષ્ણોર્દીનદુઃખાપનોદનમ્ ।
સ્યા ગુણે સ્યં ભવે સ્યસ્તુ દુઃખહાનાવિતિ સ્મૃતઃ ॥ ૩૪॥

ધીશબ્દસ્તુ ભગવતો ધર્મસ્થાપનવાચકઃ ।
ધીસ્તુ ધર્મપદે ધર્મે ધૃતિજ્ઞાપ્ત્યોરિતિ સ્મૃતઃ ॥ ૩૫॥

આધિવ્યાધિહરત્વાર્થે મશ્ચ હિશ્ચાક્ષરે ઉમે ।
મોઽગ્નૌ જીવે વ્યાધિનાશે ધાતરીન્દૌ ચ મા શ્રિયામ્ ॥ ૩૬॥

હિસ્તુ વ્યાધિપરીહારે વૈદ્યે હેતાવિતિ સ્મૃતઃ ।
ધીશબ્દાચ્છુભસદ્વૃત્ત્યોર્હેતુત્વમભિધીયતે ॥ ૩૭॥

ધીસ્તુ વિદ્યાત્મકલ્યાણસદાચારેષ્વિતિ સ્મૃતેઃ ।
નાનાભીત્યપહારિત્વં યદ્વયેનાભિધીયતે ॥ ૩૮॥

યસ્ત્યાગે નિલયે કામે દાતરીશે ચ ધાતરિ ।
ભીત્યભાવે યમે મિત્રે વિશ્વાસેઽગ્ગ્રાવિતિ સ્મૃતેઃ ॥ ૩૯॥

વિષ્ણોરત્રાખિલૈશ્વર્યપ્રદત્વં વક્તિ નઃ પદમ્ ।
અસ્મદર્થે સર્વલોકશ્રીદાને યુધિ નઃ પદમ્ ॥ ૪૦॥

ના પુમાન્ નૌર્જલોત્તારે નેત્યભાવ ઇતિ સ્મૃતેઃ ।
નિઃસીમાભ્યધિકસ્થાનપ્રાપ્તિરુક્તા પ્રશબ્દતઃ ॥ ૪૧॥

પ્રો જટાયાં પ્રકૃષ્ટાર્થસ્થાનપ્રાપ્તાવિતિ સ્મૃતેઃ ।
સર્વલોકનિયન્તૃત્વં ચોશબ્દેનાભિધીયતે ॥ ૪૨॥

સમુચ્ચયે ચેતિશબ્દશ્ચોશબ્દશ્ચ નિયન્તરિ ।
ચસ્તુલુષ્કે સ્વરે ચોરે પુંશ્ચકોર ઇતિ સ્મૃતેઃ ॥ ૪૩॥

સર્વલોકાધિપત્યં હિ વિષ્ણોરુક્તં દશબ્દતઃ ।
અ- વિભૂતિદ્વિતયૈશ્વર્યમુક્તં વિષ્ણોર્દશબ્દતઃ ।(પાઠ ભેદઃ)
દં કલત્રેષુ દઃ સર્વલોકાધિપ ઇતિ સ્મૃતેઃ ॥ ૪૪॥

સમસ્તફલદાતૃત્વં યાદિત્યન્તિમમક્ષરમ્ ।
યાસ્ત્રિયાં પદપઞ્જર્યોર્યદ્વેતૌ યાત્ ફલપ્રદે ॥ ૪૫॥

યમિત્યવ્યયમોઙ્કારે શોભાલક્ષ્મ્યોરિતિ સ્મૃતેઃ ।
એવમેતે બ્રહ્મગુણા ગાયત્રીવર્ણબોધિતાઃ ॥ ૪૬॥

પ્રકાશ્યન્તે રામકથાસઙ્ગ્રહે નારદેરિતે ।
તત્તદ્ગુણપરે ગ્રન્થે તે તે વર્ણાઃ સમુદ્ધૃતાઃ ॥ ૪૭॥

તદિત્યસ્યૈકદેશસ્તુ પ્રબન્ધાદૌ સમુદ્ધૃતઃ ।
તદ્યોયન્ધીણિનશ્ચો ચ વર્ણાસ્ત્વત્રાર્ધમુદ્ધૃતાઃ ॥ ૪૮॥

કેચિદ્વર્ણાસ્ત્વેકદેશે રહસ્યે ચાત્મભૂદ્ધૃતાઃ ।
વાન્તાત્ પૂર્વો વર્ણ ઇતિ નાન્તો તઃ પદમિત્યપિ ॥ ૪૯॥

સ જગામ વનં વીર ઇત્યત્રૈવ સ ઉદ્ધૃતઃ ।
વિરાધં રાક્ષસં હત્વેત્યત્ર વિશ્ચ સમુદ્ધૃતઃ ॥ ૫૦॥

ખડ્ગ ચ પરમપ્રીતસ્તૂણી ચેત્યત્ર તુઃ કૃતઃ ।

વસતસ્તસ્ય રામસ્યેત્યાદિગ્રન્થે વ ઉદ્ધૃતઃ ॥ ૫૧॥

સઙ્ગતો વાનરેણેતિ સ્થલે રેકાર ઉદ્ધૃતઃ ।
હનુમદ્વચનાચ્ચૈવ સુગ્રીવેણેતિ તત્ર ણઃ ॥ ૫૨॥

સુગ્રીવાયેત્યત્ર પદે યંવર્ણસ્યાર્ધમુદ્ધૃતમ્ ।
ઉત્સ્મીયત્વેત્યસ્ય પૂર્વં ભકારશ્ચ સમુદ્ધૃતઃ ॥ ૫૩॥

તતોઽગર્જદ્ધરિવર ઇત્યત્રૈવ વિભાતિ ગઃ ।
અભિષિચ્યેત્યુત્તરત્ર વોઽસ્તિ દેકારપૂર્વકઃ ॥ ૫૪॥

ભરતસ્યાન્તિકં રામ ઇત્યત્ર સ્યેતિ ચાક્ષરમ્ ।
એકદેશેન ધીકારઃ સુધાર્મિક ઇતિ સ્થલે ॥ ૫૫॥

નિરામયો હ્યરોગશ્ચેત્યત્ર મશ્ચ હિકારયુક્ ।
નાર્યશ્ચાવિધવેત્યત્ર ધીશબ્દશ્ચૈકદેશતઃ ॥ ૫૬॥

ન ચાગ્નિજં ભયં કિઞ્ચિદિતિ શ્લોકે તુ યદ્વયમ્ ।
નગરાણિ ચ રાષ્ટ્રાણીત્યત્ર નઃ પદમુદ્ધૃતમ્ ॥ ૫૭॥

અશ્વમેધશતૈરિષ્ટ્વેત્યાદિશ્લોકે પ્ર ઉદ્ધૃતમ્ ।
ચોવર્ણસ્ત્વેકદેશેન ચાતુર્વર્ણ્યમિતિ સ્થલે ॥ ૫૮॥

દશવર્ષસહસ્રાણીત્યક્ષરોપાન્ત ઉદ્ધૃતઃ ।
સમુદ્ધૃતં પ્રબન્ધાન્તે ગાયત્રીચરમાક્ષરમ્ ॥ ૫૯॥

વાલ્મીકિરત્ર સિધ્દાર્થાન્ વ્યાચકાર સુવિસ્તરમ્ ।
પૂર્ણં રામાયણં શ્લોકૈશ્ચતુર્વિંશત્સહસ્રકૈઃ ॥ ૬૦॥

શ્લોકોઽયં તપ ઇત્યાદિસ્તત્પ્રબન્ધસ્ય ચાદિમઃ ।
સુપ્રતિષ્ઠિત ઇત્યન્તં શ્રીમદ્રામાયણં વિદુઃ ॥ ૬૧॥

પ્રતિશ્લોકસહસ્રાદૌ મન્ત્રવર્ણાઃ સમુદ્ધૃતાઃ ।
ચતુર્વિંશત્સહસ્રાણામાદ્યશ્લોકાઃ પૃથક્ પૃથક્ ।
ક્રમેણ દર્શયિષ્યન્તે ગાયત્ર્યક્ષરગર્ભિતાઃ ॥ ૬૨॥

(ગાયત્રીમન્ત્ર અક્ષરાણાં(વર્ણાનાં) શ્રીમદ્ વાલ્મીકિરામાયણે પ્રદર્શિતાઃ)

શ્રીમદ્ બાલકાણ્ડે પ્રથમસર્ગાદૌ - ૧-૧-૧

તપઃસ્વાધ્યાયનિરતં તપસ્વી વાગ્વિદાં વરમ્ । (અત્ર તકારઃ ગાયત્રી પ્રથમાક્ષરમ્- ત)

નારદં પરિપપ્રચ્છ વાલ્મિકિર્મુનિપુઙ્ગવમ્ ॥

શ્રીમદ્ બાલકાણ્ડે ત્રિંશે સર્ગે -૧-૩૦-૧૮(૧૯)

સ તેન પરમાસ્ત્રેણ માનવેન સમાહતઃ । (અત્ર સકાર ગાયત્રી દ્વિતીયક્ષરં -સ)

સમ્પૂર્ણં યોજનશતં ક્ષિપ્તઃ સાગરસમ્પ્લવે ॥

શ્રીમદ્ બાલકાણ્ડે ત્રિષષ્ટિતમે સર્ગે -૧-૬૩-૩ -૪

વિશ્વામિત્રો મહાતેજા ભૂયસ્તેપે મહાતપાઃ । (અત્રતૃતીયાક્ષરં -વિ)

તતઃ કાલેન મહતા મેનકા પરમાપ્સરઃ ॥

અયોધ્યા કાણ્ડે ચતુર્દશે સર્ગે -૨-૧૪-૩૬

ચતુરશ્વો રથઃ શ્રીમાન્ નિસ્ત્રિંશો ધનુરુત્તમમ્ । (અત્રચતુર્થાક્ષં - તુ)

વાહનં નરસંયુક્તં છત્રં ચ શશિસન્નિભમ્ ॥

અયોધ્યા કાણ્ડે ચતુશ્ચત્વારિંશે સર્ગે- ૨-૪૪-૫

વર્તતે ચોત્તમાં વૃત્તિં લક્ષ્મણોઽસ્મિન્ સદાઽનઘઃ । (અત્રગાયત્ર્યા પઞ્ચમાક્ષરં -વ)

દયાવાન્ સર્વભૂતેષુ લાભસ્તસ્ય મહાત્મનઃ ॥

અયોધ્યા કાણ્ડે એકસપ્તતિતમે સર્ગે -૨-૭૧-૩૩

દ્વારેણ વૈજયન્તેન પ્રાવિશચ્છ્રાન્તવાહનઃ । (અત્રરે ઇતિ ષષ્ટાક્ષરં - રે)

દ્વાઃસ્થૈરુત્થાય વિજયં પૃષ્ટસ્તૈઃ સહિતો યયૌ ॥

અયોધ્યા કાણ્ડે એકોનશતતમે સર્ગે -૨-૯૯-૨૫

ઉટજે રામમાસીનં જટામણ્ડલધારિણમ્ । (અત્રપ્રથમે પાદે સપ્તમાક્ષરં - ણ)

તં તુ કૃષ્ણાજિનધરં ચીરવલ્કલવાસસમ્ ॥

આરણ્ય કાણ્ડે દ્વાદશે સર્ગે ૩ -૧૨-૪

તે વયં વનમત્યુગ્રં પ્રવિષ્ટાઃ પિતૃશાસનાત્ । (અત્રાષ્ટમાક્ષરં - યં)

દ્રષ્ટુમિચ્છામહે સર્વે ભગવન્તં નિવેદ્યતામ્ ॥

આરણ્ય કાણ્ડે સપ્તચત્વારિંશે સર્ગે ૩-૪૭-૧૦

મમ ભર્તા મહાતેજા વયસા પઞ્ચવિંશકઃ । (અત્રનવમાક્ષરં - ભ)

અષ્ટાદશ હિ વર્ષાણિ મમ જન્મ ન ગણ્યતે ॥

શ્રીમત્કિષ્કિન્ધા કાણ્ડે ચતુર્થે સર્ગે ૪-૪-૩

તતઃ પરમસંહૃષ્ટો હનુમાન્ પ્લવગર્ષભઃ । (અત્ર દશમાક્ષરં -ગ)

પ્રત્યુવાચ તતો વાક્યં રામં વાક્યવિશારદઃ ॥

શ્રીમત્કિષ્કિન્ધા કાણ્ડે એકત્રિંશે સર્ગે ૪-૩૧-૧

સકામિનં દીનમદીનસત્ત્વં શોકાભિપન્નં સમુદીર્ણકોપમ્ ।   (અત્ર ગાયત્ર્યા એકાદશાક્ષરં - દે)
નરેન્દ્રસૂનુર્નરદેવપુત્રં રામાનુજઃ પૂર્વજમિત્યુવાચ ॥

શ્રીમત્સુન્દરકાણ્ડે પ્રથમસર્ગાદૌ ૫-૧-૧
તતો રાવણનીતાયાઃ સીતાયાઃ શત્રુકર્શનઃ ।   (અત્રગાયત્ર્યા દ્વાદશાક્ષરં- વ)
ઇયેષ પદમન્વેષ્ટું ચારણાચરિતે પથિ ॥

શ્રીમત્સુન્દરકાણ્ડે સપ્તવિંશે સર્ગે ત્રિજટાસ્વપ્ને ૫-૨૭-૧૩
તતસ્તસ્ય નગસ્યાગ્રે આકાશસ્થસ્ય દન્તિનઃ ।   (અત્રગાયત્ર્યા ત્રયોદશાક્ષરં - સ્ય)
ભર્ત્રા પરિગૃહીતસ્ય જાનકી સ્કન્ધમાશ્રિતા ॥

શ્રીમત્સુન્દરકાણ્ડે ષટ્ચત્વારિંશે સર્ગે ૫-૪૬-૧૦
નાવમાન્યો ભવદ્ભિશ્ચ હરિર્ધીરપરાક્રમઃ ।   (અત્રગાયત્ર્યા ચતુર્દશાક્ષરં - ધી)
દૃષ્ટા હિ હરયઃ સર્વે મયા વિપુલવિક્રમાઃ ॥

શ્રીમદ્યુદ્ધકાણ્ડે પ્રથમસર્ગાદૌ ૬-૧-૧
શ્રુત્વા હનુમતો વાક્યં યથાવદભિભાષિતમ્ ।   (અત્રગાયત્ર્યા પઞ્ચદશાક્ષરં -મ)
રામઃ પ્રીતિસમાયુક્તો વાક્યમુત્તરમબ્રવીત્ ॥

શ્રીમદ્યુદ્ધકાણ્ડે અષ્ટાવિંશેસર્ગે ૬-૨૮-૨૬ -૨૭ રાવણં પ્રતિ શુકઃ
રક્ષોગણપરિક્ષિપ્તો રાજા હ્યેષ વિભીષણઃ ।   (અત્રગાયત્ર્યા ષોડશાક્ષરં - હિ)
શ્રીમતા રાજરાજેન લઙ્કાયામભિષેચિતઃ ॥

શ્રીમદ્યુધ્દકાણ્ડે પઞ્ચાશેસર્ગે નાગપાશવિમોચનસમયે ૬-૫૦-૪૦
તેજો વીર્યં બલં ચૌજ ઉત્સાહશ્ચ મહાગુણાઃ ।   (અત્રગાયત્ર્યાઃસપ્તદશાક્ષરં -ધી (ધિ))
પ્રદર્શનં ચ બુદ્ધિશ્ચ સ્મૃતિશ્ચ દ્વિગુણં તયોઃ ॥

શ્રીમદ્યુધ્દકાણ્ડે અષ્ટષષ્ટિતમેસર્ગે ૬-૬૮-૧
કુમ્ભકર્ણં હતં દૃષ્ટ્વા રાઘવેણ મહાત્મના ।   (અત્રગાયત્ર્યાઃઅષ્ટાદશાક્ષરં -ચ (યો))
રાક્ષસા રાક્ષસેન્દ્રાય રાવણાય ન્યવેદયન્ ॥

શ્રીમદ્યુધ્દકાણ્ડે એકાશીતિતમેસર્ગે ૬-૮૧-૧
વિજ્ઞાય તુ મનસ્તસ્ય રાઘવસ્ય મહાત્મનઃ ।   (અત્રગાયત્ર્યાઃ એકોનવિંશતિતમાક્ષરં- ય)
સન્નિવૃત્યાહવાત્તસ્માત્પ્રવિવેશ પુરીં તદા (તતઃ) ॥

શ્રીમદ્ યુધ્દકાણ્ડે દ્વાદશશતતમેસર્ગે ૬-૧૧૨-૨૫ (ગીતાપ્રેસ્ ૬-૧૧૧-૧૦૦)
મરણાન્તાનિ વૈરાણિ નિર્વૃત્તં નઃ પ્રયોજનમ્ ।   (અત્રગાયત્ર્યાઃ વિંશતિતમાક્ષરં -નઃ)
ક્રિયતામસ્ય સંસ્કારો મમાપ્યેષ યથા તવ ॥

ઉત્તરશ્રીરામાયણે પ્રથમસર્ગાદૌ ૭-૧-૧
પ્રાપ્તરાજ્યસ્ય રામસ્ય રાક્ષસાનાં વધે કૃતે । (અત્રગાયત્ર્યાઃએકવિંશાક્ષરં - પ્ર)
આજગ્મૂ ઋષયઃ સર્વે રાઘવં પ્રતિનન્દિતુમ્ ॥

ઉત્તરશ્રીરામયણે દ્વાવિંશેસર્ગે ૭-૨૨-૭(૮)
તતઃપ્રાચોદયત્સૂતસ્તાન્હયાન્રુધિરપ્રભાન્ । (અત્ર ગાયત્ર્યાઃ દ્વાવિંશાક્ષરં- ચો)
પ્રયયૌ ભીમસન્નાદો યત્ર રક્ષપતિઃ સ્થિતઃ ॥

ઉત્તરશ્રીરામાયણે એકચત્વારિંશાદૌ ૭-૪૧-૧
વિસૃજ્ય ચ મહાબાહુઃ ઋક્ષવાનરરાક્ષસાન્ । (અત્રગાયત્ર્યાઃ ત્રયોવિંશાક્ષરં -દ)
ભ્રાતૃભિઃ સહિતો રામઃ પ્રમુમોદ સુખં સુખી ॥

ઉત્તરશ્રીરામાયણે ષટ્સપ્તતિત,એસર્ગે ૭-૭૬-૨૭ -૨૮
બ્રાહ્મણસ્ય ચ ધર્મેણ ત્વયા વૈ જીવિતઃ સુતઃ । (અત્રગાયત્ર્યાઃચતુર્વિંશાક્ષરં -યા)
ઉષ્યતાં ચૈવ રજનીં સકાશે મમ રાઘવ ॥

(શ્રીગોવિન્દરાજ ભાષ્યે ત્રયોવિંશાક્ષરમ્)

પ્રબન્ધાન્તશ્લોકઃ
લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાભવઃ ।
યેષામિન્દીવરશ્યામો હૃદયે સુપ્રતિષ્ઠિતઃ ॥

ચતુર્વિંશત્સહસ્રાણામાદ્યાઃ શ્લોકા ઇમે ક્રમાત્ ।
એષુ શ્લોકેષુ દૃશ્યન્તે મન્ત્રવર્ણા યથાક્રમમ્ ॥

દૃશ્યતે ચ પ્રબન્ધાન્તે મન્ત્રાન્તવ્યઞ્જનાક્ષરમ્ ।
તસ્માદિદં ત્વાદિકાવ્યં ગાયત્રીં મહતીં વિદુઃ ॥

ઇત્યેતદાદિકાવ્યાર્થરહસ્યં સામ્પ્રદાયિકમ્ ।
૧ વિદ્યારણ્યમુનીન્દ્રેણ દર્શિતં વિદુષાં મુદે ॥ ૨

॥ ઇતિ પરમહંસપરિવ્રાજકપરિવૃઢેન માધવારણ્યમુનિવરદયાલબ્ધબોધેન
શ્રીવિદ્યારણ્યમુનીશ્વરેણ પ્રકાશિતં
શ્રીમદ્રામાયણરહસ્યં સમ્પૂર્ણમ્ ॥

[૧ ક । -વિદ્યારણ્યમુનિર્બ્રહ્મવિદા પ્રાકાશયન્મુદા ॥ પાઠાન્તરમ્

૨ ખ ॥ -ગાયત્ર્યાઃ શ્રુતિમાતુરર્થમખિલં પ્રત્યક્ષરં વ્યાકરો-
દેકૈકસ્ય સહસ્રમારચિતવાઙ્ગ્રન્થાશ્ચ રામાયણે ।

પ્રાલોડ્યાખિલવેદસારમસકૃધત્તારકં બ્રહ્મ તદ્
રામો વિષ્ણુરહસ્યમૂર્તિરિતિ યો વિજ્ઞાય વલ્મીકભૂઃ ॥ (અધિકઃ પાઠઃ )

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીરામજયમ્ ॥

Srimad Valmiki Ramayanam (શ્રીમદ્ વાલ્મીકીરામાયણં) has 24000 verses(શ્લોકાઃ).In his commentary Sri Maheshwarathirtha says as "અથ ચતુર્વિંશત્યક્ષરગાયત્ર્યાખ્યપરબ્રહ્મવિદ્યાવિલાસભૂતં રામાયણં ચતુર્વિંશતિસહસ્રૈઃ શ્લોકૈશ્ચકાર । તદિદં વ્યાક્રિયતે તપઃ સ્વાધ્યાયેત્યાદિઃ ગાયત્રીવર્ણસહિતશ્લોકસઙ્કેતઃ
ચતુર્વિંશતિસઙ્ખ્યાકા ગાયત્રીવર્ણસંયુતાઃ ।
યે શ્લોકાઃ સન્તિ તાનત્ર વિલિખામિ યથાક્રમમ્ ॥

શ્લોકે ચ પ્રતિસાહસ્રં પ્રથમે પ્રથમે ક્રમાત્ ।
ગાયત્ર્યાક્ષરમેકૈકં સ્થાપયામાસ વૈ મુનિઃ ॥

ગાયત્ર્યાસ્ત્રીણિ ચત્વારિ દ્વે દ્વે ત્રીણ્યથ ષટ્ ક્રમાત્ ॥

ચત્વારિ સપ્તકાણ્ડેષુ સ્થાપિતાન્યક્ષરાણિ તુ ॥"

The Gayatri Mantra itself is an essence of vedas and the 24 letters are the starting of every thousand shlokas of Srimad Valmiki Ramayanam and this is well known. Equally popular is Gayatri Ramayanam which lists 24 shlokas from Valmiki Ramayanam.Sri Govindaraja Swami in his commentary mentions 23 verses which are different from those mentioned in Gayatri Ramayanam (probably this is based on the version of ramayanam in southern version(s).

In the journal of Sri ShankaraGurukulam, Srirangam, had published a work by name "Ramayanarahasya" of one Vidyaranya, disciple of Madhavaranya in 1941. This Sri Vidyaranya is different from the famous Sri Vidyaranya

who was the pontiff of Sri Sringeri Pitha ( who composed Panchadashi and other vedanta literature).

The Ramayanarahasya has 90 shlokas in total. Sri Vidyaranya explains as follows:

1) In verses 1 to 18 the qualities implied by the syllables of Gayatri mantra. In verses 1 to 4, the brahma gunas (બ્રહ્મ ગુણાઃ) of the words of the gayatri mantra (ગાયત્રીપદબોધિતાઃ).They are ૧)ગુણાઢ્યત્વં
૨)કારણત્વં ૩)શરણ્યત્વં ૪)પ્રકાશતા ૫)પ્રકાશિત્વં
૬) ધ્યેયતા and in last 4 letters નિયન્તૃતા
. These qualities are described in the verses of 1st sarga of Balakanda, known as સંક્ષેપરામાયણં or, બાલરામાયણં or, મૂલરામાયણં or નારદવાક્યં.These qualities of gayatri are brought out in verses 1 to 18 of 1st sarga of Balakanda and in verses 1 to 18 of Ramayanarahasya.

2) ૧)ગુણાઢ્યત્વં - is explained with reference to સંક્ષેપરામાયણં. The verses 2 to 18 of 1st sarga explain in detail the quality of) ગુણાઢ્યત્વં.Similarly the other qualities are explained in verses 12,15 etc.

3) In verses 19 to 48, the qualities implied by each of the 24 letters of Gayatri Mantraare explained in the 1st sarga of Balakanda .As a ready reference they are listed below

ગાયત્રીમન્ત્રાક્ષરં ગુણં
ત(તત્) સત્યજ્ઞાનાદિ (સત્યં જ્ઞાનં અનન્તં-સ્વરૂપલક્ષણં )
સ સત્યપ્રતિજ્ઞત્વં
વિ પરાભિભૂતિસામર્થ્યં
તુ શ્રીવિષ્ણોઃ ચક્રાદ્યાયુધસંગ્રહઃ

વ શ્રીભગવત અભયદાયિતા

રે શ્રીભગવતઃ ભક્તનિષેવ્યતા (ભક્તસેવ્યતા)

ણ્ બ્રહ્મણઃ દીનાનાથશરણ્યતા

ય શ્રીભગવતઃ મિત્રવિશ્વાસઃ

ભ શ્રીભગવતઃ બલાવિષ્કરણમ્

ગ આશ્રિતાનન્દકારિત્વં

દે સર્વપૂજ્યત્વમ્

વ સર્વપૂજ્યત્વમ્

સ્ય ભગવતઃ દીનદુઃ ખાપનોદનમ્

ધી ભગવતઃ ધર્મસ્થાપનમ્

મ ભગવતઃ આધિવ્યાધિહરત્વમ્

હિ ભગવતઃ આધિવ્યાધિહરત્વમ્

ધિ શુભસદ્વૃત્ત્યોઃ હેતુત્વં

ય નાનાભીત્યપહારિત્વમ્

ય નાનાભીત્યપહારિત્વમ્

નઃ ભગવતઃ અખિલૈશ્વર્યપ્રત્વમ્

પ્ર નિઃસીમાભ્યધિકસ્થાનપ્રાપ્તિઃ

ચો સર્વલોકનિયન્તૃત્વમ્

દ સર્વલોકાધિપત્યમ્ (વિભૂતિદ્ધિત્યૈશ્વર્યમ્)

ય સમસ્તફલદાતૃત્વમ્

એતે બ્રહ્મગુણાઃ - These qualities are explained with
સ્મૃતિ પ્રમાણમ્ by SRI VIDYARANYA

In verses 48 to 62 ,the occurrence of all these 24 letters of Gayatri Mantra in સંક્ષેપરામયણમ્ is explained.
The letter sa is in verse in the first half of verse
23 સ જગામ વનં વીરઃ પ્રતિજ્ઞામાનુપાલયન્ ।.
Similarly the presence of other letters in other verses from 2 to 100 of first sarga are explained.

Afterwards, the 24 verses from all the સપ્તકાણ્ડાનિ (from all the 7 Cantos) ,where the letters occur sequentially are mentioned. They are in agreement with

the shlokas given in શ્રીમદ્ગોવિન્દરાજીયવ્યાખ્યા -
શ્રીરામાયણભૂષણં. These 24 verses are different
from those in Gayatri Ramayanam, which is popular.
In gayatri Ramayanam, the letters occur in the beginning
of each verse,whereas in Ramayanarahasya the letters
occur in the body of the verse, and not necessarily
in the beginning of the verse. These 24 verses also
are called as or quoted as ગાયત્રીરામાયણં.
This is another version of GAYATRI RAMAYANAM
ગાયત્રીરામાયણં. Valimki Ramayanam is uttama kAvya
,which is called as સુહૃદ્ સંહિતા, કાન્તા સંહિતા,
ઇતિહાસં, આદિકાવ્યં. In Ramayana, there are hidden
meanings(વ્યઙ્ગ્યાર્થ) - પદવ્યઙ્ગ્યાર્થ,
વાક્યવ્યઙ્ગ્યાર્થ, પ્રબન્ધવ્યઙ્ગ્યાર્થ. Although
Ramavatara is મર્ત્યાવતાર મનુષ્યાવતાર of
બ્રહ્મન્, Ramayana (રામાયણ) brings out or explains
the paratattva of tAraka brahma shrIrAma -sad kAvya also.

From Ramayanarahasya, the esoteric of gayatri mantra can
be understood by ordinary persons who do not have the
advantage of knowledge of વેદાન્ત or વ્યઙ્ગ્યાર્થ
or ગૂઢાર્થ in kAvya.

Encoded by Venkata Subramanian venkatasubr at gmail.com
Proofread by Venkata Subramanian, Sunder Hattangadi sunderh at hotmail.com
Commentary by Venkata Subramanian

---

*Ramayanarahasyam by Vidyaranya*
pdf was typeset on February 24, 2018

Please send corrections to *sanskrit@cheerful.com*